अहमपि वनं गच्छामीति वदन्तं लक्ष्मणं परिष्वजमानो रामो ऽमन्यत । प्रियां वनगमनात्पूर्वं पश्यामीति । एवं चिन्तयित्वा सीतापतिः सीतां द्रष्टुं गतः । सीताप्यागच्छन्तं विवर्णवदनं भर्तारं दृष्ट्वा चिन्तया बाध्यमानैवमब्रवीत् । एतादृशस्य शोकस्य कारणमुच्यतामिति । एवमुक्तो दशरथतनयो ऽब्रवीत् । पुरा राज्ञा सत्यप्रतिज्ञेन दशरथेन कैकेय्यै महावरौ दत्तौ । अद्य ममाभिषेके क्रियमाणे सा वदति । प्रथमवरेण चतुर्दशवर्षाणि रामेण दण्डकारण्य उष्यताम् । द्वितीयेन भरतो यौवराज्ये ऽभिषिच्यतामिति । ततो ऽहमद्यैव पितृप्रतिज्ञामनुसृत्यायोध्यां परित्यजन्वनं गच्छेयम् । त्वयात्रैव स्थीयताम् । देवपूजां यथाविधि सर्वदा कुर्वती भरतशत्रुघ्नौ सेवस्वेति । एवं वदति रामे जनकतनया संक्रुद्धा सत्युपहासमकरोत् । आर्यपुत्र किं भाषसे । ईदृशं वचनं न कदापि त्वादृशा वीरा वक्तुमर्हन्ति । भर्तुर्वनं गच्छतः कथं भार्या नगरे तिष्ठेदिति । एवं ब्रुवतीं सीतां न नेतुमैच्छद्रामो वनदुःखानि चिन्तयन् । सो ऽवदत् । शृणु सीते । वने वसता जनेन बहुदुःखान्यनुभूयन्ते । वने सिंहादयो* हिंस्रजन्तवश्चरन्ति यथाकामम् । तत्र च सन्ति बहून्यन्यानि मार्गश्रमादीनि दुःखानीति । तद्वचनं श्रुत्वा दुःखिता सीताश्रुपूर्णनयना पुनरब्रवीत् । हे राम । त्वया निरूप्यमाणानि दुःखानि सुखान्येव भवेयुस्त्वया सह संचरन्त्या मम । त्वयि वनं गते कथमिह जीवेयम् । त्वया त्यक्ताहं विषं पिबेयमग्निं वा प्रविशेयम् । अलमनेन वचनेन । दण्डकारण्यं गच्छता त्वया सहाहमागच्छामीति । रामो ऽपि तां शोचन्तीं परिष्वज्य सान्त्वयन्नेवावदत् । साधु प्रिये साधु । यदि मया सहागन्तुमिच्छसि तर्ह्यागच्छेति ॥

---

* See "आदिः" in the glossary